শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৫০

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥ শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৫০

*ৱতসাসুরৱধৱর্ণনম্ বকাসুরৱধৱর্ণনং চ*

তরলমধুকৃদ্ৱৃন্দে ৱৃন্দাৱনেথ মনোহরে
পশুপশিশুভিঃ সাকং ৱতসানুপালনলোলুপঃ।
হলধরসখো দেৱ শ্ৰীমন্ ৱিচেরিথ ধারযন
গৱলমুরলীৱেত্ৰং নেত্ৰাভিরামতনুদ্যুতিঃ॥ ১ ॥

ৱিহিতজগতীরক্ষং লক্ষ্মীকরাম্বুজলালিতং
দদতি চরণদ্ৱন্দ্ৱং ৱৃন্দাৱনে ত্ৱযি পাৱনে।
কিমিৱ ন বভৌ সম্পতসম্পূরিতং তরুৱল্লরী-
সলিলধরণীগোত্রক্ষেত্ৰাদিকং কমলাপতে॥ ২ ॥

ৱিলসদুলপে কান্তারান্তে সমীরণশীতলে
ৱিপুলযমুনাতীরে গোৱর্ধনাচলমূর্ধসু।
ললিতমুরলীনাদঃ সঞ্চারযন্ খলু ৱাতসকং
ক্ৱচন দিৱসে দৈত্যং ৱতসাকৃতিং ত্ৱমুদৈক্ষথাঃ॥ ৩ ॥

রভসৱিলসতপুচ্ছং ৱিচ্ছাযতোস্য ৱিলোকযন
কিমপি ৱলিতস্কন্ধং রন্ধ্ৰপ্ৰতীক্ষমুদীক্ষিতম্।
তমথ চরণে বিভ্ৰদ্বিভ্ৰামযন্ মুহুরুচ্চকৈঃ
কুহচন মহাৱৃক্ষে চিক্ষেপিথ ক্ষতজীৱিতম্॥ ৪ ॥

নিপততি মহাদৈত্যে জাত্যা দুরাত্মনি ততক্ষণং
নিপতনজৱক্ষুণ্ণক্ষোণীরুহক্ষতকাননে।
দিৱি পরিমিলদৱৃন্দা ৱৃন্দারকাঃ কুসুমোতকরৈঃ
শিরসি ভৱতো হর্ষাদ্বর্ষন্তি নাম তদা হরে॥ ৫ ॥

সুৰভিলতমা মূৰ্ধন্যূৰ্ধ্ৱং কুতঃ কুসুমাৱলী
নিপততি তৱেত্যুক্তো বালৈঃ সহেলমুদৈরযঃ।
ঝটিতি দনুজক্ষেপেণোৰ্ধ্ৱং গতস্তৰুমণ্ডলাত
কুসুমনিকরঃ সোযং নূনং সমেতি শনৈরিতি॥ ৬ ॥

ক্বচন দিৱসে ভূযো ভূযস্তরে পরুষাতপে
তপনতনযাপাথঃ পাতুং গতা ভৱদাদযঃ।
চলিতগরুতং প্ৰেক্ষামাসুৰ্বকং খলু ৱিস্মৃতং
ক্ষিতিধরগরুচ্ছেদে কৈলাসশৈলমিৱাপরম্॥ ৭ ॥

পিবতি সলিলং গোপৱ্ৰাতে ভৱন্তমভিদ্ৰুতঃ
স কিল নিগিলন্নগ্নিপ্ৰখ্যং পুনৰ্দ্ৰুতমুদ্ৱমন্।
দলযিতুমগাত্ ত্ৰোট্যাঃ কোট্যা তদাশু ভৱান্ ৱিভো
খলজনভিদাচুঞ্চুশ্চঞ্চূ প্ৰগৃহ্য দদার তম্॥ ৮ ॥

সপদি সহজাং সন্দ্ৰষ্টুং ৱা মৃতাং খলু পূতনা-
মনুজমঘমপ্যগ্ৰে গত্বা প্ৰতীক্ষিতুমেৱ ৱা।
শমননিলযং যাতে তস্মিন্ বকে সুমনোগণে
কিরতি সুমনোৱৃন্দং ৱৃন্দাৱনাত্ গৃহমৈযথাঃ॥ ৯ ॥

ললিতমুরলীনাদং দূরান্নিশম্য ৱধূজনৈ-
স্তৱরিতমুপগম্যারাদারূঢমোদমুদীক্ষিতঃ।
জনিতজননীনন্দানন্দঃ সমীরণমন্দির-
প্ৰথিতৱসতে শৌরে দূরীকুরুষৱ মমামযান্॥ ১০ ॥

**********